# Skandaprokta Hatakeshakhyalingamahima

# સ્કન્દપ્રોક્તા હાટકેશાખ્યલિઙ્ગમહિમા

## Document Information

Text title : Skandaprokta Hatakeshakhyalingamahima

File name : skandaproktAhATakeshAkhyalingamahimA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 24 pAtAle hATakeshaprabhAvaH | 25-30||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તા હાટકેશાખ્યલિઙ્ગમહિમા

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
તલ્લિઙ્ગપ્રભયા સુદીપિતમહો પાતાલલોકં સદા
નાગાનાં વિલસત્ફણામણિગણજ્યોત્સ્નોરુધારાતતાઃ ।
નો ચન્દ્રાર્કસુવિદ્યુદુજ્જ્વલમહાવહ્નિપ્રભાભાદિકાઃ
નોષા નો ભગણાઃ સદૈવ ન દિવારાત્રં મહેશાશ્રયાત્ ॥ ૨૫॥

વૃન્દારવૃન્દા અપિ ચન્દ્રમૌલિ-
પાદારવિન્દભજનાય મુદા પ્રયાન્તિ ।
નાગૈર્નગોપમમહોરુશરીરશીર્ષૈ-
ર્નગારિવાહસહિતાઃ પરિપૂજ્ય યાન્તિ ॥ ૨૬॥

તત્પાતાલતલેઽપિ હાટકમહાલિઙ્ગં સદેવાર્ચયન્
નાગૈર્નાગવરાઃ સ્વકીયસુમહાશુણ્ડોરુકાણ્ડોત્થિતૈઃ ।
ધારાસાર સુપુષ્કરોદ્ધૃતલસદ્બિલ્વીદલૈઃ કોમલૈઃ
તે ચાષ્ટૌ નિવસન્તિ ભૂધરવરાઃ કૈલાસસાનુપ્રભાઃ ॥ ૨૭॥

પાતાલે તાલકેતુ પ્રભૃતિબલિરાઃ શત્રુવિત્રાસના યે
દેવા અપ્યમરાવતીં પરિવિહાયાત્રૈવ સમ્મોદિતાઃ ।
વિપ્રેન્દ્રાઃ સુરસિદ્ધદૈત્યનિકરા યૂયં ચ નાગોત્તમાઃ ।
શાર્વં લિઙ્ગમુમાતેઃ પ્રિયતમં શ્રીહાટકેશાભિધમ્ ॥ ૨૮॥

કષ્ટં વીક્ષ્ય ત્રિવિષ્ટપં શ્રુતિશિરોનિષ્ઠાં હિ સમ્પ્રાપ્ય તે
ધન્યાસ્તે શિપિવિષ્ટ નિષ્ઠમનસા સમ્પૂજયન્ત્વાદરાત્ ।
જૂટાહિદ્યુતિકોટિકૂટઘટનોત્તુઙ્ગોત્તમાઙ્ગોલ્લસ-
ચ્ચન્દ્રાંશુસ્ફુટદુત્પલારુણરજઃ સ્વઃ સિન્ધુમૌલિં હરમ્ ॥ ૨૯॥

લીલાપાઙ્ગસ્ફુલિઙ્ગસઙ્ગતમહાનઙ્ગાઙ્ગમાતઙ્ગ હૃ-
ત્તલ્લિઙ્ગોત્તમમધ્યસઙ્ગતમુમાદેહાર્ધલિઙ્ગં હરમ્ ।
બાલેન્દુદ્યુતિ જૂટિતાખિલજટત્કોટીરપાટીરકં

ઘોટીવેદવધૂટિકાર્ધવિલસદ્ગાત્રં નિટાલેક્ષણમ્ ॥ ૩૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તા હાટકેશાખ્યલિઙ્ગમહિમા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૨૪ પાતાલે હાટકેશપ્રભાવઃ । ૨૫-૩૦॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 24 pAtAle hATakeshaprabhAvaH . 25-30..

Notes:
Skanda સ્કન્દ narrates the Glory of Hāṭakeśaliṅga હાટકેશલિઙ્ગ located in Pātāla Loka પાતાલલોક.

Proofread by Ruma Dewan

*Skandaprokta Hatakeshakhyalingamahima*
pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*